# संस्कृत वार्ता:

दिनाङ्क : 05.10.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- नवदेहल्यां भारत-स्विट्जरलैंड-शिखर-वार्ता सम्पन्ना; व्यापार-सम्बन्धान् सम्प्रवर्धयितुं, वैश्विकीं सम्भरण-शृङ्खलां द्रढयितुं च उभौ देशौ प्रतिबद्धौ इति प्रधानमन्त्री नरेन्द्र मोदी।
- भारत-यूरोपीय-सङ्घ-व्यापार-सन्धिः भारतस्य उत्कृष्ट-वार्ता-कौशलस्य परिचायिका इति वित्त-मन्त्री निर्मला सीतारामन्।
- पञ्जाब-मुख्यमन्त्रि-कार्यालयस्य भ्रष्टाचार-प्रकरणे उच्च-न्यायालयस्य कठोरः आदेशः। प्रवर्तन-निदेशालयस्य अभियोगान् आधृत्य सी बी आई-अन्वेषणस्य समादेशः।
- कर्णाटक-केरल-तमिलनाडु-प्रभृति-दक्षिण-प्रदेशेषु श्वः पर्यन्तं अतिवृष्टिः सम्भाव्यते इति ऋतुविज्ञानविभागः।

---------------------------------------------

<u>भारतेन स्विट्जरलैंड-वार्ता</u>

सैन्य-प्रशिक्षणे रक्षा-उद्योगेषु च मैत्री-सम्बन्धं सुदृढं कर्तुम् अद्य भारतेन स्विट्जरलैंड-देशेन सह नवदेहल्याम् अभूतपूर्वः विचार-विनिमयः समाचरितः। विदेशमन्त्रालयस्य सचिवेन सिबी-जॉर्ज इत्यनेन सहर्षं विज्ञापितं यत् स्विस-संस्थाः 'मेक-इन्-इण्डिया' इति राष्ट्रिय-सङ्कल्पस्य छायायाम् आत्म-निर्भर-रक्षा-उत्पादने सहभागित्वं विधातुं अर्हन्ति। प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिनः भावपूर्ण-आमन्त्रणेन भारत-धरां सम्प्राप्तः स्विस-राष्ट्रपतिः गाइ-पार्मेलीन अद्य मन्त्रिमण्डल-स्तरीय-वार्तासु सहभागी भूत्वा पंच महत्त्वपूर्णानि सहमति-पत्राणि हस्ताक्षरितवान्। असौ 'TEPA' व्यापार-सन्धेः प्रथम-वार्षिकोत्सव-वेलायाम् 'समृद्धि-शिखर-सम्मेलने' अपि राष्ट्रस्य प्रतिनिधित्वं विधास्यति। एतदतिरिच्य सप्तविंशत्युत्तरद्विसहस्र तम-वर्षस्य जून-मासे जेनेवा-नगरे समायोज्यमाने 'ए आई-शिखर-सम्मेलने' उभावपि देशौ मानव-कल्याणाय दृढ-सङ्कल्पबद्धौ वर्तेते।

-----------------------------------------------

<u>जयशंकर</u>

भारतस्य राजकीययात्रायाम् आगतेन 'स्विस्-सङ्घस्य' राष्ट्रपतिना गाइ-पार्मेलीन इत्यनेन सह केन्द्रीयविदेशमन्त्री डॉ. एस. जयशङ्करः अद्य नवदेहल्यां औपचारिकसम्मेलनम् अकरोत्। एकस्मिन् सामाजिकान्तर्जालीयपटले स्वीय-हृदयोद्गारं प्रकाशयन् विदेश-मन्त्रिणा 'भारत-यूरोपीय-मुक्त-व्यापार-सङ्घ'-सन्धिसञ्जात-प्रतिश्रुतिम् अवसृत्य द्विपक्षीय-सहयोग-विस्तारणाय राष्ट्रपतेः पार्मेलीन इत्यस्य सहृदयता भूरिशः अभिनन्दिता। एतदतिरिच्य, असौ सविश्वासं प्रोक्तवान् यत् प्रधानमन्त्रिणा नरेन्द्र-मोदिना सह राष्ट्रपतेः आसन्नः विचार-विनिमयः उभयोः देशयोः बहुविधसम्बन्धं जगति सुदूरं प्रसारयिष्यति।

-----------------------------------------------

<u>निर्मला सीतारामन्</u>

नवदेहल्यां 'म्यूनिख-नेतृ-सम्मेलने' केन्द्रीय-वित्त-मन्त्री निर्मला सीतारामन् अवदत् यत् भारत-अमेरिका-देशयोः मध्ये व्यापार-सन्धेः सम्भाषण-प्रक्रिया अधुनापि प्रवर्त्तते, पूर्णतां च नाधिगता। मन्त्रिणा स्पष्टीकृतं यत् एषा वार्ता अत्यन्तं गभीरा, सूक्ष्म-विचारैः युक्ता च अस्ति। सा न्यगादीत् यत् व्यापार-सन्तुलनं भारतस्य पक्षे अनुकूलम् अस्ति, द्विपक्षीय-वार्ता च मतान्तर-निरसनाय सर्वोत्तमं साधनम् अस्ति।

-----------------------------------------------

<u>पञ्जाब- सी बी आई</u>

पञ्जाब-हरियाणा-उच्च-न्यायालयः मुख्यमन्त्रि-कार्यालयस्य विशेषाधिकारिणमुद्दिश्य प्रवृत्तस्य 'स्थानान्तरणाय भ्रष्टाचार-प्रकरणस्य' अन्वेषणाय सी बी आई-संस्थाम् आदिशत्। प्रवर्तन-निदेशालयस्य अभियोगान् वीक्ष्य उच्च-न्यायालयः एतं निर्णयं कृतवान्। न्यायालयेन स्पष्टीकृतं

यत् उच्च-पदस्थानां भ्रष्टाचार-प्रकरणानाम् निष्पक्ष-सत्यता-प्रकटनाय सी बी आई अन्वेषणम् अत्यावश्यकम् अस्ति।

---------------------------------------------

## भूपेन्द्र - प्रोजेक्ट चीता

प्रोजेक्ट-चीता' इत्युपक्रमे अद्य कुनो-राष्ट्रिय-उद्याने भारते जातायाः 'के.जे.पी.-२१' चित्रक्याः गर्भात् पञ्च-स्वस्थ-शावकाः अजनिषत। अनेन सह भारते चित्रकाणां आहत्य सङ्ख्या षष्टिः यावत् संवृत्ता।
केन्द्रीय-पर्यावरण-मन्त्री भूपेन्द्र-यादवः प्रोक्तवान् यत् एतेषां पितुः बोत्सवाना-देशीयत्वात् भारते प्रथमतया बोत्सवाना-वंशानुक्रमस्य आरम्भः भवति, यः वर्धमान-चित्रक-प्रजातये नूतनम् आनुवंशिकसामर्थ्यं विधास्यति।

---------------------------------------------

## प्रह्लाद जोशी

विद्यालयेषु बालकानाम् आत्मिक-विकासाय, मनः-शान्तये, सम्पूर्णाभ्युदयाय च 'राष्ट्रिय-मानसिक-स्वास्थ्य-नीत्याः' प्रारूपं विकासयितुम् अद्य केन्द्रीय-शिक्षा-मन्त्री प्रह्लाद जोशी मन्त्रालयस्य उच्च-पदस्थैः अधिकारिभिः सह गम्भीरं विचार-मन्थनं विहितवान्।

---------------------------------------------

## सञ्चार-साथी

केन्द्रीय-सञ्चार-मन्त्रालयेन अद्य विज्ञापितं यत् तस्य 'सञ्चार-साथी' इति नामधेयं जालपुटम् त्रयोविंशत्युत्तरद्विसहस्र तम-वर्षस्य मई-मासे स्व-प्रवर्त्तनादारभ्य साम्प्रतं यावत् त्रिंशत्-कोटिः अभ्यागमनानि व्यतीतवत्। मन्त्रालयस्य 'दूरसञ्चार-विभागेन' निर्मितम् इदं सुगम-अन्तरपृष्ठ-सम्पन्नं जालपुटम् उपभोक्तृभ्यः सन्दिग्ध-दूरभाष-आह्वानानां सन्देशानां च शीघ्र-प्रतिवेदन-सुविधां विदधाति। एतत् जालपुटम् अनधिकृत-चलदूरभाष-सम्बन्धान् ज्ञापयति, नष्ट-मुषित-

यन्त्राणि रोधयति, तेषां प्रामाणिकतां च परीक्षते। अनेन मञ्चेन साम्प्रतं चतुर्दश लक्षाधिकानि नष्ट-यन्त्राणि पुनर्लब्धानि, चतुः कोट्यधिकानां नागरिक-निवेदनानां च निष्ठापूर्वकं समाधानानि विहितानि।

-----------------------------------------------

## विश्व-वासभूमि-दिवस

नवदेहल्यां समायोजिते 'विश्व-वासभूमि-दिवस-समारोहे' केन्द्रीय-आवास-नगर-कार्य-राज्यमन्त्री तोखन साहू अवोचत् यत् पर्यावरण-संरक्षणम् आधुनिक-विकासश्च न द्वौ पृथक्-मार्गौ, प्रत्युत एकस्यैव प्रगतिरथस्य द्वे चक्रे स्तः। मन्त्रिप्रवरेण सहर्षं निगदितं यत् सप्तचत्वारिंशदधिक द्विसहस्र तम-वर्षाभ्यन्तरे 'विकसित-भारतस्य' स्वप्नं राष्ट्रस्य मुख्यं लक्ष्यम् अस्माकं नगराणि ग्रामान् च हरित-स्वच्छ-सुन्दर-जीवनानुकूलान् विधातुम् अस्ति। मन्त्रिणा सविशेषं निगदितं यत् साम्प्रतिकेषु वर्षेषु भारतेन स्वनीतीनां केन्द्रे मानव-गरिम्णा सह पर्यावरण-सन्तुलनं परम-प्राधान्येन समादृतम्।

-----------------------------------------------

## विशेष-गहन-पुनरीक्षण

मतदातृ-सूचीनां 'विशेष-गहन-पुनरीक्षण-वेलायाम्' एकपक्षीय-निर्णय-ग्रहणस्य अभियोगेन मुख्य-निर्वाचन-आयुक्तस्य ज्ञानेश-कुमारस्य सद्यः पद-च्युतिं प्रार्थयन्तीं याचिकाम् अद्य उच्चतम-न्यायालयः अन्तरिम-आदेशप्रदानेन अस्वीकृतवान्। सर्वोच्च-पीठेन सहर्षं स्पष्टीकृतं यत् प्रथमं तावत् प्रत्युत्तरदातृभ्यः उत्तरं प्राप्य वैधानिक-नियमानां लङ्घनं जातम् न वा इति परीक्षिष्यते। न्यायालयेन एतदपि समालोचितं यत् केवलं वृत्तपत्र-वार्ताः समाश्रित्य एकपक्षीय-आदेशः पारितः भवितुं न अर्हति। पीठेनाङ्कितं यत् यदि साक्ष्यैः एतत् सिद्धं भवेत् यत् निर्णयाः आवश्यक-बहुमतेन न गृहीताः, तर्हि तेषां सर्वथा पुनर्विचारः सम्भवेत्।

-----------------------------------------------

## एल-नीनो

एल-नीनो-प्रभावजन्य-अल्प-वृष्ट्या जलाशय-सञ्चयेषु न्यूनतां समीक्ष्य महाराष्ट्रस्य जल-संसाधन-मन्त्री गिरिश-महाजनः अक्टोबर-१६ दिनाङ्कात् सर्वेषु नगरेषु न्यूनतमं दश-प्रतिशतं जल-मितव्ययम् आदिशत्। स्थानीय-संस्थाः जलस्य अपव्ययं रोद्धुम्, उद्योगाश्च त्रिंशत्-प्रतिशतं जलं पुनरुपेतुम् आदिष्टाः। तथैव कृषि-कार्याय पेय-जलस्य पशूनां च आवश्यकतां पूरयित्वा एव सेचनाय जलं दास्यते।

-----------------------------------------------

## भारतीय-ऋतु विज्ञान-विभाग

भारतीय-ऋतु विज्ञान-विभागेन कर्णाटक-केरल-तमिलनाडु-पुदुच्चेरी-प्रदेशेषु श्वः यावत् अतिवृष्टिपरा सूचना प्रकटिता। ऋतुविभागानुसारम् आगामि-दिन-द्वये त्रये वा मराठवाडा-विदर्भ-महाराष्ट्र-छत्तीसगढ-प्रान्तेषु वातावरणम् अत्यन्तम् अनुकूलं भविष्यति।

।। इति वार्ता: ।।